भोः। नैव वासः समाधत्ते कुमारपरिरक्षणात्”। १८५ अ० वाणमातरि भाग० १०।६३।२९ “तन्माता कोटवी नाम नग्ना मुक्तशिरोरुहा। पुरोऽवतस्थे कृष्णस्य पुत्रप्राणरिरक्षया” उभयत्र नग्नत्वमुक्तकेशत्वविशेषणं तत्काले तथाभूतत्वज्ञापनाय अतस्तयोस्तदा नग्नत्वमुक्तकेशयुक्तत्वात्तथात्वम्

**कोटवीपुर** न० ६त० वाणासुरपुरे तन्मातुस्तत्र प्रधानत्वात् तयैव वाणासुरस्य रक्षणात् तत्पुरस्य तन्नामत्वम्।

**कोट्टार** पु० कुट्ट—आरक् पृषो०। १कूपे२नागरे ३पुष्करिण्याः घाटके च। (घाट) मेदि०

**कोठ** पु० कुठि—अच् नि० नलोपः। मण्डलाकारे कुष्ठरोगे। तल्लक्षणमुक्तं निदाने “असम्यग्वमनो दीर्णपित्तश्लेष्मान्न निग्रहैः मण्डलानि” सकण्डूनि रागवन्ति बहूनि च। उत्कोठः सानुबन्धश्च कोठ इत्यभिधीयते” इति माधवकरः। रक्षितेन चान्यथोक्तम् “वरटीदष्टसङ्काशः कण्डूमान् लोहितोऽसकृत्फलितान्। क्षणिकोत्पादविनाशः कोठ इति निगद्यते तज्ज्ञैः” “उद्वर्त्तनन्तु किन्नोयं कण्डूकोठानिलापहम्” “कण्डूकोठानिलस्तम्भमलरोगापहश्च सः” “उद्वर्षणन्त्विष्टिकया कण्डूकोठविनाशनम्” इति च सुश्रुतः

**कोठर** पु० कुठि—अर पृषो०। अङ्कोठवृक्षे राजनि०

**कोठरपुष्पी** स्त्री कोठरस्य पुष्पमिव पुष्पमस्या ङीप्। वृद्धदारके राजनि०

**कोण** पु० कुण—करणे घञ् कर्त्तरि अच् वा। येन धनुराकृतिना काष्ठेन वीणादयोवाद्यन्ते तस्मिन् वादनसाधने १काष्ठभेदे २अस्रौ, अमरः। ३गृहादीनामेकदेशे, ४अस्त्राणामग्रभागे, ५लगुडे, मेदि० ६मङ्गलग्रहे हेम० ७शनिग्रहे विश्वः। द्वयोर्दिशोर्मध्यभागे ८विदिशि राजनि० “कनककोणैरभिहन्यमानः” काद० “भेरीमृदङ्गवीणानां कोणसंघटितः पुनः” रामा० “खट्वहस्याङ्गणे तेन चत्वारः स्वर्णपूरिताः। कुम्भाश्चतुर्षु कोणेषु निगूढाः स्थापिता भुवि” कथास०। “सुवर्णकोणाभिहतः प्राणदद्दयादुन्दुभिः” रामा० “त्रिन्दुत्रिकोणवसुकोणदशारयुग्मम्” तन्त्रसा०। समकोणं विषमकोणम् क्षेत्रम्

**कोणकुण** पु० कोणे मस्तकैकदेशे कुणति चलति कुण—क। मत्कुणे (उकुण) हेमच०

**कोणाघात** पु० “ढक्काशतसहस्राणि भेरीशतशतानि च। एकदा यत्र हन्यन्ते कोणाघातः स उच्यते” इति भरतोक्ते वाद्यसंघाते ३त०। काष्ठेन वीणादेस्ताडने च। “कोणाघातेषु गर्ज्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः” वेणी० [अमरः

**कोणि** त्रि० कुण्—इन्। आदानशक्तिहीनहस्तयुक्ते (कोणा)

**कोथ** पु० कुथ—पातित्ये घञ्। १नेत्ररोगभेदे (कोँधो)। कर्त्तरि अच्। २गलिते त्रि० मेदि० “मूढेन मांसलुब्धेन यदस्थिशल्यमन्नेन सहाभ्यवहृतं यदावगाढ़पुरीषोन्मिश्रमपानेनाधः प्रेरितमसम्यगागतं गुदं क्षिणोति तत्र क्षतनिमित्तः कोथ उपजायते” इति सुश्रुतोक्ते गुह्यक्षयकारके ३भगन्दररोगोपद्रवभेदे। भावे घञ्। ४गलने “तस्मिन् क्षते पूयरुधिरावकीर्णमांसकोथे भूमाविव जलसिक्तायां कृमयो जायन्ते” सुश्रुतः “तत्र सविषमत्स्यकीटदर्दुरमूत्रपुरीषकोथजाताः” सुश्रु० “कीटमूत्रपुरीषाण्डशवकोथप्रदूषितम्” (जलम्) सुश्रु० “गोशकृत्कोथजा मन्दा, मध्याः काष्ठेष्टकोद्भवाः” सुश्रु०

**कोदण्ड** न० कु—शब्दे विच् कौःशब्दितोदण्डोऽस्य। १धनुषि, “विस्फुर्जच्चण्ड कोदण्डः” भाग० ३।२१।५१। तत्तुल्यत्वात् २भ्रूलतायां, ३देशभेदे च। अमरः ४धनूराशौ च।

**कोदार** पु० ईषदुदारः कोःकादेशः। धान्यभेदे “न ग्राह्यं सर्व्वथा माषवरकोदारकोद्रवम्” कात्या० १,६,८, सूत्र भाष्ये कर्कधृतवाक्यम्

**कोद्रव** पु० कु—विच् कौः सन् द्रवति द्रु—अच् कर्म्म०। (कोदो) धान्यभेदे अमरः “कोद्रवोवातलो ग्राही हिमः पित्तकफापहः” भावप्र० तद्गुणाउक्ताः। “अयज्ञिया वै कोद्रवाः” श्रुतिः। “अतोऽन्यदपि संग्राह्यं सदृशं धान्यमात्रकम्। न ग्राह्यं सर्वथा माषवरकोदारकोद्रवम्” कात्या० श्रौ० १,६,८, सू० भा० कर्कधृतवाक्यम्। तस्य वैश्वदेवे अग्राह्यता “पचनाग्निं समुज्ज्वाल्य वैश्वदेवं समाचरेत्। निष्पावान् कोद्रवान् माषान् कलायांश्चनकांस्त्यजेत्” काशी० ३५ अ०। तस्याश्राद्धीयता भा० अनु० ४३६२ श्लोके उक्ता यथा “अश्राद्धीयानि धान्यानि कोद्रवाः पुलकास्तथा”

**कोनालक** पुंस्त्री कोने जलेन अलति अपर्य्याप्नोति अल—ण्वुल्। संघचारिणि प्लवे कृष्णपुच्छे श्वेतोदरे जलचरपक्षिभेदे हंससारसेत्युपक्रमे कोनालकं पठित्वा “प्लवाः संघचारिणः” सुश्रु०। इन् कोनालि अप्यत्र। “कुनावीकोनालिमश्वतीन् सेवेत” सुश्रु० स्त्रियां ङीप्।

**कोन्वशिर** पु० ब्राह्मणशापेन शूद्रत्वप्राप्ते क्षत्रियभेदे, भा० अनु० ३५ अ०